**International Journal of Research in Social Sciences**
Vol. 12 Issue 6 ,June 2022,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# संस्कृतकाव्यशास्त्रे गुणविमर्शः

**डॉ. दिवांशुकुमारः**
विश्वविद्यालयप्राध्यापकः
स्नातकोत्तरसंस्कृतविभागः
जयप्रकाशविश्वविद्यालयः, छपरानगरम्

काव्यम् आकर्षकं सौन्दर्यमयं रमणीयं वा कर्त्तुं अनेकविधानि तत्त्वानि साधनानि वा प्रयुज्यन्ते। संस्कृतकाव्यशास्त्रिभिः काव्यलक्षणे गुणालंकारयोः समावेशः कृतोऽस्ति । आचार्यवामनानुसारं काव्यं ग्राह्यमलङ्कारात्, सौन्दर्यमलङ्कारः। आचार्यमम्मटः काव्यं लक्षयति ।

–'तददोषौ शब्दार्थौ सगुणावानलङ्कती पुनः क्वापि।' अनेन काव्ये गुणतत्त्वस्य सत्ता ज्ञायते। आचार्यैं : गुणस्वरूपं तद्भेदाश्च निर्दिष्टानि सन्ति।

**(क) गुणस्वरूपम् –आचार्य वामनः** काव्यगुणस्य व्यवस्थितं लक्षणं दत्तवान् अस्ति। तस्मात् पूर्वम् आचार्यभरतेन दश–गुणानां विस्तृतं वर्णनं विहितम्, किन्तु तल्लक्षणं न दत्तम् ।

भरतः गुणान् भावात्मकतत्त्वानि न मत्वा अभावात्कम् अर्थात् दोषविपर्ययं मेने। यथा–

*गुणविपर्ययाद् ऐषाम् माधुर्यौदार्यलक्षणाः ।।*
*अथवा 'एत एवं विपर्यस्ता गुणाः काव्येषु कीर्तिताः।।* [2]

आचार्यदण्डिनापि दश गुणाः विशदं विवेचिताः, किन्तु सामान्यलक्षणं न कृतम्। तथाहि–

'दोषाः विपत्तये तत्र गुणाः सम्पत्तये तथा[3]

आचार्यवामनेन निर्धारितं गुणस्वरूपम् –

'काव्यशोभायाः कर्तारो धर्मा गुणाः ।[4]

ये खलु शब्दार्थयोर्धर्माः काव्यशोभां कुर्वन्ति ते गुणाः। ते चौजः प्रसादादयः । न यमकोपमादयः । कैवल्येन तेषाम् काव्यशोभाकरत्वात्। ओजः प्रसादादीनां तु केवलानामस्ति काव्यशोभाकरत्वमिति ।

'पूर्वे नित्याः'

'पूर्वे गुणा नित्याः। तैर्विना काव्यशोभानुत्पत्तेः[5]

वामनः भरतादीनां प्रतिकूलत्वेन गुणं रसधर्मं न स्वीकृत्य शब्दार्थयोः धर्म स्वीचकार। काव्ये च तस्य स्वतन्त्रां महनीयां च सत्ताम् अङ्गीकृतवान्। अयं गुणं रसाश्रितं न मत्वा रसं गुणाय अङ्गम् अङ्गीकृतवान्। एतन्मतानुसारं रसः कान्तिगुणस्य अङ्गम् अस्ति।

ध्वनिवादीआचार्यः आनन्दवर्धनः गुणं रसस्य धर्मम् अथवा काव्यस्य प्रधानभूततत्त्वस्य रसस्याश्रितं कथयति। इमे गुणाः काव्यस्य शरीरभूतशब्दार्थयोः धर्माः न, अपितु आत्मभूतस्य रसस्य अङ्गानि सन्ति। यथोक्तम्–

'तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः ।[6]

काव्यस्यात्मा रसोऽस्ति गुणाश्च रसस्य धर्माः सन्ति। यथा मानवशरीरे शौर्यादिगुणानां स्थितिः भवति, तथैव काव्ये रसोत्कर्षाधायकाः धर्मा गुणाः, रसेन एतेषामचलस्थितिः भवति। यत्र रसः भवति तत्र गुण स्थितिः सम्भवति। शौर्यवीरत्वादिगुणानां सम्बन्धः मनुष्यस्य शरीरेण न भूत्वा आत्मना सह भवति। यदि आत्मना सह एतेषां सम्बन्धः न भूत्वा शरीरेण सह स्यात्तर्हि मृत्योः पश्चादपि एते गुणाः शरीरे विद्यमानाः भवेयुः, किन्तु एवं न भवति। मृते एव मनुष्यस्य गुणाः तिरोहिताः भवन्ति अतः इदं सिद्धं भवति यत् आत्मनः अभावे गुणानां स्थितिः असम्भवास्ति । इत्थमेव सम्बन्धः रसेन सह काव्यगुणानामपि अस्ति। रसः काव्यस्यात्मा वर्तते, अतः अनेन सह गुणसम्बन्धः स्वतः स्थापितो भवति। अग्निपुराणकारः गुणानामभावात् अलङ्कारयुक्तं काव्यम् आनन्दप्रदं न स्वीकरोति। रमण्याः शरीरे सौन्दर्यादिगुणाभावात् हारः– यथा भारस्वरूपः प्रतीयते तथैव अलङ्कारैः अन्वितं सदपि काव्यं गुणं विना आनन्ददायकं न भवितुमर्हति । यथोक्तम् –

अलंकृतमपि प्रीत्यै न काव्यं निर्गुणं भवेत् ।
वपुष्यललिते स्त्रीणां हारो भारायते परम्।।[7]

आचार्यभोजः गुणम् उत्कृष्टतरं निर्दिशन् अलङ्कारयुक्तं काव्यं गुणेन विना आनन्दरहितं स्वीकृ

**International Journal of Research in Social Sciences**
Vol. 12 Issue 6 ,June 2022,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

तवानस्ति। अतः अलङ्कारयुक्तात् काव्यकाव्याद् गुणयुक्तत्वं श्रेयस्करमस्ति। यथोक्तम् –

अलंकृतमपि श्रव्यं न काव्यं गुणवर्जितम् ।
गुणयोगस्तयोर्मुख्यो गुणालंकारयोगयोः ।।"[8]

आचार्यमम्मटमतानुसारं यद्यपि मुख्यरूपेण गुणाः रसस्य धर्माः सन्ति। तथापि गौणरूपेण ते शब्दार्थयोरपि धर्माः मन्यन्ते। आत्मनः शौर्यादीनां गुणानामिव रसस्य उत्कर्षाधायकाः एवम् अपरिहार्यधर्माः गुणाः सन्ति। एतेषां काव्ये अचलस्थितिः भवति। यथोक्तम् –

ये रसस्यांगिनो धर्माः शौर्यादय इवात्मनः ।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः । [9]

आचार्यविश्वनाथः मम्मटस्य काव्यलक्षणमेव अनुसृत्य गुणानाह–

रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा । [10]

**गुणाः–**

यथा खल्वङ्गित्वमाप्तस्यात्मन उत्कर्ष हेतुत्वाच्छौर्यादयो गुणशब्दवाच्याः

काव्येऽङ्गित्वमाप्तस्य रसस्य धर्माः स्वरूपविशेषा माधुर्यादयोऽपि। समर्पकसन्दर्भस्य काव्यव्यपदेशस्यौपयिकानुगुण्यभाज इत्यर्थः ।

गुणस्वरूपविवेचनस्य निष्कर्षोऽयमस्ति यत् गुणाः रसस्य धर्माः सन्ति। काव्ये च एतेषां अचला नित्या वा स्थितिर्वर्तते। एते रसस्य उत्कर्षकाः काव्यस्य उत्कर्षहेतवो वा तत्त्वविशेषाः सन्ति ।

**(ख) गुणानां भेदाः –**

गुणानां भेदनिरूपणं व्यापकाधारे कृतमस्ति। अस्मिन् सम्बन्धे संस्कृतस्य आचार्याणां वर्गपञ्चकम् अस्ति। प्रथमः वर्गः तेषामाचार्याणां वर्तते, ये भरतस्य आधारं गृहीत्वा गुणं शब्दार्थयोः धर्मं स्वीकुर्वन्तः अस्य दशभेदानामुल्लेखं कृतवन्तः । अत्र वर्गे भरतः, दण्डी, वामनः, वाग्भटः प्रथमः, वाग्भटद्वितीयः जयदेवश्च समायान्ति। एतन्मध्ये दण्डी वामनश्च गुणस्य सम्बन्धं क्रमशः मार्गेण रीत्या वा स्थापितं कुर्वन्ति। वामनस्तु एकेनैव नाम्ना दशशब्दगुणान्, दशार्थगुणान् च मनुते। भरतकुतदशगुणानां नामानि सन्ति श्लेषः, प्रसादः, समताः, समाधिः, माधुर्यम, ओजः, पदसुकुमारता, अर्थव्यक्तिः, उदारता कान्तिश्च। यथोक्तम् तेन नाट्यशास्त्रे–

श्लेषः प्रसादः समता समाधिर्माधुर्यमोजः पदसौकुमार्यम् ।
अर्थस्य चव्यक्तिरुदारता च कान्तिश्च काव्यार्थगुणा दशैते ।।[11]

द्वितीयवर्णान्तर्गत आनन्दवर्धनः तथा तस्यानुयायिनः मम्मटः हेमचन्द्रः विद्याधरः विश्वनाथः जगन्नाथश्च सन्ति। इमे दशगुणानामन्तर्भावं माधुर्योजः प्रसादेषु त्रिषु गुणेषु कुर्वन्ति।

तृतीयवर्ग एकाकी कुन्तकः अस्ति। अयं साधारणगुणान्तर्गतम् औचित्यं सौभाग्यञ्च स्वीकरोति। विशेषगुणेषु माधुर्य, प्रसादं, लावण्यं, आभिजात्यञ्च निर्दिष्टवानस्ति। कुन्तकेन मार्गान्तर्गतं गुणानां निरूपणं कृतमस्ति। त्रयाणां च मार्गाणां सुकुमार–विचित्र–मध्यमानां च अन्तर्गतान् इमान् स्थापितवानस्ति। कुन्तककृतः मार्गः कविस्वभावाश्रितोऽस्ति, देशपरकः नैव। चतुर्थवर्गे द्वावाचार्यौ स्तः भोजराजः विद्यानाथश्च। भोजः गुणानां चतुर्विंशतिभेदान् कृतवान् । प्रत्येकञ्च बाह्याभ्यन्तरवैशेषिक–रूपेण विभज्य द्विसप्तति (72) भेदानां निरूपणं कृतवान्। अस्य प्रमुखेषु चतुर्विंशातिभेदेषु दश तु भरतकृतभेदाः सन्ति। अवशिष्टानां नामानि सन्ति– उदात्तता– और्जित्यम्–प्रेयः, सुशब्दता, सौक्ष्म्यम्, गाम्भीर्यम्, विस्तरः, संक्षेपः, सम्मितता, भाविकता, गतिः, रीतिः, उक्तिः, प्रौढिश्च [12]

पंचमवर्गान्तर्गतं हेमचन्द्रेण जयदेवेन च संकेतिताः अज्ञातनामानः आचार्याः सन्ति यैः पञ्च षड्वा गुणा वर्णिताः। पंचगुणाः सन्ति ओजः, प्रसादः, मधुरिमा, साम्यम्, औदार्यञ्च ।[13]

षड्गुणेषु–न्यासः–निर्वाहः प्रौढिः औचितिः–शास्त्रान्तररहस्योक्तिः संग्रहश्च सन्ति।[14]

अग्निपुराणे गुणानां सङ्ख्या अष्टादश वर्तते। तेषां च त्रयः विभागाः कृताः सन्ति–शब्दगुणः,

अर्थगुणः, शब्दार्थगुणश्च। काव्यशरीररूपं शब्दम् आश्रिता गुणाः शब्दगुणाः कथ्यन्ते। एतेषां संख्याः 'सप्त' सन्ति श्लेषः, लालित्यम्, गाम्भीर्यम्, सुकुमारता, उदारता, सत्यम् यौगिकी च।
यथोक्तम् –

शब्दमाश्रयते काव्यं शरीर यः स तद्गुणः ।
श्लेषो लालित्यगाम्भीर्ये सौकुमार्यमुदारता ।।[15]
सत्येव यौगिकी चेति गुणाः शब्दस्य सप्तधा ।।

अर्थगुणस्य षड् भेदाः सन्ति–माधुर्य, संविधानं, कोमलता, उदारता, प्रौढिः, सामयिकत्वञ्च । अर्थगुणः तत्र भवति यत्र केनचित् प्रकारेण प्रस्तुतीकृते विषये उत्कर्षस्य निर्वाहं कुर्यात्। शब्दस्य अर्थस्य च उपकारकाः गुणाः उक्ताः सन्ति। ते षड्विधाः सन्ति प्रसादः, सौभाग्यम्, यथासंख्यम् प्रशस्तिः, पाकः, रागश्च।

गुणस्य वर्गीकरणसम्बन्धे वामनः शब्दस्य अर्थस्य च धर्मत्वेन तान् चमत्कारान् उक्तवानस्ति। किन्तु आनन्दवर्धनः तेषां सम्बन्धं रसेन स्थापयित्वा तान् चित्तवृत्तिरूपान् स्वीकृतवानस्ति। सः रसानुभूतेः प्रक्रियायां चित्तस्य अवस्थात्रयस्य धृतिः दीप्तिः, व्याप्तिश्चेति आधारेण त्रीन् गुणान् परिकल्पितवान् तथा माधुर्यं (द्रुतिः), ओजः (दीप्तिः), प्रसादश्च (व्याप्तिः) इतिरूपेणतान् प्रतिष्ठापितवान् ।

वामनाभिमतानां शब्दगुणानामर्थगुणानां च नामान्युभयत्र समान्येव सन्ति, किन्तु तेषां लक्षणानि भिन्नानि–2 सन्ति अधस्तात् वामनाभिमतानां शब्दगुणानामर्थगुणानाञ्च नामानि प्रस्तूयन्ते–

| वामनाभिमतानि शब्दगुणनामानि | वामनाभिमतानि अर्थगुणनामानि |
|---|---|
| 1. ओजः | 1. ओजः |
| 2. प्रसादः | 2. प्रसादः |
| 3. श्लेषः | 3. श्लेषः |
| 4. समता | 4. समता |
| 5 समाधिः | 5. समाधिः |
| 6. माधुर्यम् | 6. माधुर्यम् । |
| 7. सौकुमार्यम् | 7. सौकुमार्यम् |
| 8. उदारता | 8. उदारता |
| 9. अर्थव्यक्तिः | 9. अर्थव्यक्तिः |
| 10. कान्तिः | 10. कान्तिः |

आचार्यो मम्मटः वामनोक्तान् गुणान् न स्वीकृत्य त्रीनेव काव्य गुणान् स्वीकरोति। तथा चोक्तं काव्य प्रकाशकर्त्रा–

माधुर्योजः प्रसादख्याः त्रयस्तेन पुनर्देश ।[16]

मम्मटः वामनकृतदशशब्दगुणानां दशार्थगुणानाञ्च खण्डनं कृत्वा तान् त्रिषु गुणेषु अन्तर्भावितवान्। एतन्मतानुसारं वामनोक्तदशशब्दगुणेषु केचन तु माधुर्यादित्रिषु गुणेषु अन्तर्भूताः भवन्ति केचन दोषाभावरूपाः भवन्ति, केचन च दोषरूपाः सन्ति। यथोक्तम् मम्मटेन –

केचिदन्तर्भन्त्येषु दोषत्यागात्परे श्रिताः ।।
अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश।[17]

बहूनामपि पदानामेकपदवद्भासमानात्मा यः श्लेषः यश्चारोहावरोहक्रमरूपः समाधिः, या च विकटत्वलक्षणा उदारता, यश्चौजोमिश्रितशैथिल्यात्मा प्रसादः, तेषामोजस्यन्तर्भावः । पृथक्पदत्वरूपं माधुर्यं भङ्ग्या साक्षादुपात्तम्। प्रसादनार्थव्यक्तिगृहीता। मार्गाभेदरूपा समता क्वचिद्दोषः। तथा हि मातङ्गाः 'किमुवल्गितैः' इत्यादौ सिंहाभिधाने मसृणमार्गत्यागो गुणः। कष्टत्वग्राम्यत्त्वयोर्दुष्टताभिधानात् तन्निराकरणेन अपारुष्यरूपं सौकुमार्यम्, औज्वल्यरूपा कान्तिश्च स्वीकृता। एवं न शब्दगुणाः ।

पदार्थे वाक्यरचनं वाक्यार्थे च पदाभिधा।
प्रौढिव्याससमासौ च साभिप्रायत्वमस्य च ।।

इति या प्रौढिः ओज इत्युक्तं तद्वैचित्यमात्रं न गुणः। तदभावेऽपि काव्यव्यवहारप्रवृत्तेः । अपुष्टार्थत्वाधिकपदत्वानवीकृतत्वामङ्गलरूपाश्लीलग्राम्याणां निराकरणेन च साभिप्रायत्वरूपमोजः, अर्थवैमल्यात्मा प्रसादः, उक्तिवैचिर्त्यरूपं माधुर्यम्, भावोक्त्यलंकारेण रसध्वनिगुणीभूतव्यङ्ग्याभ्यां च वस्तुस्वभावस्फुटत्वरूपा अर्थव्यक्तिः, दीप्तिरसत्वरूपा कान्तिश्च स्वीकृते। क्रमकौटिल्यानुल्वणत्वोपपत्तियोगरूपघटनात्मा श्लेषोऽपि विचित्रत्वमात्रम्। अवैषम्यस्वरूपा समता दोषाभावः । न पुनर्गुणः। कः खल्वनुमत्तोऽन्यस्य प्रस्तावेऽन्यदभिदध्यात् । अर्थस्यायोनेरन्यच्छायायोनेर्वा यदि न भवति

**International Journal of Research in Social Sciences**
Vol. 12 Issue 6 ,June 2022,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

दर्शनं तत् कथं काव्यम् इत्यर्थदृष्टिरूपः समाधिरपि न गुणः। एवं मुख्यरूपेण गुणाः त्रिधा वर्तन्ते –

(अ) माधुर्यगुणः

(ब) ओजोगुणः

(स) प्रसादगुणश्च ।

**(अ) माधुर्यगुणः–** चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते ।[18]

अर्थात् चित्तस्य आर्द्रतास्वरूपं सुखविशेषः माधुर्यमिति कथ्यते। यत्तु माधुर्यद्रुतिकारणमिति कथितम्, तन्न। द्रवीभावस्य आस्वादरूपाह्लादभिन्नत्वेन कार्यत्वाऽभावात्। द्रवीभावश्च स्वाभाविकानाविशिष्टत्वात्मककाठिन्यमन्युक्रोधाधिकृतदीप्तित्वविस्मयहास्याद्युपहितविक्षेप– परित्यागेन रत्नाद्याकारानुविद्धानन्दोद्बोधने सहृदयचित्तार्द्रप्रायत्वम्। तद्धि सम्भोगे, करुणे, विप्रलम्भे शृंगारे च शान्ते चाधिकं तिष्ठति ।।

मम्मटानुसारेण 'आह्लादकत्वं माधुर्य श्रृंगारे द्रुतिकारणम् ''[19]

अर्थात् द्रुतिकारणम् आह्लादकत्वं नाम आनन्दस्वरूपत्वं माधुर्यमुच्यते। माधुर्यस्य व्यंजकाः वर्णास्तु–

मूर्ध्नि वर्गान्त्यवर्णेन युक्ताष्टठडढान् विना ।
रणौलघू च तद्वयक्तौ वर्णाः कारणतां गताः [20]
अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा।

इति सन्ति। एवमेव समासवृत्तिरहिता वा लघुसमासयुक्ता रचना माधुर्यस्य व्यंजका भवन्ति ।

माधुर्यं लक्षयति–मूर्ध्नि इति। अत्र मूर्ध्नि शिरसि आदौ वर्गाः कचटतपादयस्तस्य अन्त्यवर्णेन ञ, म, ङ, ण, न् आदिना टठडढान् विना टठडढान् वर्जयित्वा युक्ताः संयुक्ताः भवन्तु, रणौ रेफणकारौ लघू लघुस्वरोपेतौ च भवतः । ते एव वर्णाः तदव्यक्तौ कारणतां गताः व्यंजकतां गताः । तथा अवृत्तिः समासरहिता अल्पवृत्तिः स्वल्पसमासयुक्ता वा रचना निर्मितिः मधुरा भवतीति भावः ।

**(ब) ओजोगुणः**

ओजश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते। मानसस्य विकासरूपत्वं हि उज्ज्वलत्वं दीप्तत्वमुच्यते। अर्थात् मानसस्य विकासरूपत्वं हि उज्ज्वलत्वं तत् ओजः, एतस्याधिक्यन्तु वीरे– वीभत्से रौद्ररसे क्रमाद् भवति। मम्मटानुसारेण ओजसो लक्षणम् –

'दीप्त्यात्मविस्तृते हेतुरोजो वीररसस्थितिः [21]

अर्थात् दीप्तिरूपा या आत्मनश्चित्तस्य विस्तृतिस्तस्य हेतुः ओजः स्वरूपं तद्वयंजक वर्णादिकञ्चाह विश्वनाथः –

'ओजश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते ।[22]

वीरवीभत्सरौद्रेषु क्रमेणाधिक्यमस्य तु वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्षौ तदन्तिमौ ।
उपर्यधो द्वयोर्वा स रेफास्टठडढैः सह।
शकारश्च षकारश्च तस्य व्यञ्जकतां गताः ।
तया समासबहुला घटनौद्धत्यशालिनी ।।

**(स) प्रसादगुणः**

प्रसादगुणस्यलक्षणम्–

चित्तं व्याप्नोति यः क्षित्रं शुष्केन्धनमिवानलः । [23]
सः प्रसादः समस्तेषु रसेषु रचनासु च ।।
शब्दास्तद्वयंजकाः अर्थबोधकाः श्रुतिमात्रतः ।[24]

अर्थात् गुणोऽयं यथा शुष्केन्धनम् अग्निं व्यानोति, तथैव चित्तं शीघ्रमेव व्याप्नोति । अपि चायं समस्तरसेसु समस्तरचनासु च भवति। तथाहि प्रसादगुणस्य व्यञ्जकाः शब्दाः श्रवणमात्रेण अर्थबोधनं कुर्वन्ति। मम्मटः प्रसादगुणं लक्षयति –

शुष्केन्धनाग्निवत् स्वच्छजलवत् सहसैव यः ।।
व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्र विहितस्थितिः ।[25]

एवं संस्कृतकाव्यशास्त्रे काव्यशास्त्रिभिर्भरतादिभिः काव्यात्मनो रसस्य धर्माः गुणाः सविस्तरं विमृष्टा इति शम्।

**सन्दर्भाः**

1. आचार्यभरतः, नाट्यशास्त्रम्, 16/96
2. तदेव
3. आचार्यदण्डी, काव्यादर्श 3/124
4. आचार्यवामन, काव्यालङ्कारसूत्रवृत्तिः 3/1/1
5. तदेव, 3/1/3
6. आनन्दवर्धनः, ध्वन्यालोकः 2/6
7. महर्षिः व्यासः, अग्निपुराणम्, 10/1
8. भोजराजः, सरस्वती कण्ठाभरणम् ।
9. आचार्यमम्मटः, काव्यप्रकाशः, 8/66
10. आचार्यविश्वनाथ, साहित्यदर्पणम्, 8/1
11. आचार्यभारतः, नाट्यशास्त्रम् 16/97
12. भोजः, सरस्वतीकंठाभरणम्, 1/60–65
13. आचार्य हेमचन्द्रः, काव्यानुशासनम्, पृ. 240
14. जयदेव, चन्द्रालोकः, 4/12
15. व्यासः, अग्निपुराणम्, 10/5–6
16. मम्मटः, काव्यप्रकाशः, 8/88
17. तदेव, तदेव, 8/72
18. विश्वनाथः, साहित्यदर्पणम्, 8/2
19. मम्मटः, काव्यप्रकाशः, 8/68 ।।
20. विश्वनाथः, साहित्यदर्पणम्, 8/3
21. मम्मटः, काव्यप्रकाशः, 6/69
22. विश्वनाथः, साहित्यदर्पणः, 6/4–5–6
23. विश्वनाथः, साहित्यदर्पणः, 8/7
24. तदेव, 8/8
25. मम्मटः, काव्यप्रकाशः, 8/70